# Guṇa Karma and Varṇa in Madhvācārya's Siddhānta



## Contents

1. Gītā 4.13: Madhva explicitly accepts guṇa-vibhāga ........ 3

2. Madhva's guṇa-vibhāga is a technical hierarchy, not four stereotypes ........ 4

3. Svābhāvika and Aupādhika Varṇa: the distinction that must not be ignored ........ 5

4. The word is guṇa-karma-vibhāga, not guṇa alone ........ 6

5. The Mahābhārata *lakṣaṇa* passage: what it actually establishes ........ 6

6. MBTN 29.30: Madhva brings in śāstric adhikāra ........ 7

7. MBTN 29.31 continues the discussion in terms of prescribed dharma ........ 8

8. The decisive Madhva statement: a Śūdra can be sāttvika ........ 8

9. The converse is equally decisive ........ 9

10. This is exactly why Hari-bhakti must be distinguished from varṇa ........ 10

11. The real mistake in the modern four-type theory ........ 11

12. The Mahābhārata *lakṣaṇa* verse therefore cannot carry the entire argument ........ 11

13. Conclusion ........ 12

Madhvacharya's Geeta Bhasya ........ 14

Madhvacharya's Geeta Tatparya Nirnaya ........ 17

Mahabharata Tatparya Nirnaya ........ 21

द्जगद्गुरु श्रीमन् मध्वाचार्य मूलमहासंस्थानम्
द्वैत वेदान्त

**श्री नारायणाय नमः ।**

**A śāstric response based on Gītā 4.13 Bhāṣya, its ṭīkās, Gītā Tātparya and Mahābhārata Tātparya Nirṇaya**

A common modern presentation reduces the four varṇas to four personality types:

- pleasure-seeking/materialistic → **Vaiśya**
- lazy, dishonest, unwilling to work → **Śūdra**
- ambitious, brilliant and desirous of wealth/honour → **Kṣatriya**
- peaceful, truthful, knowledge-seeking and compassionate → **Brāhmaṇa**

It then argues that **a person can move from one varṇa to another according to changes in his qualities**.

There is a genuine śāstric element here: **Madhvācārya explicitly accepts guṇa as part of the basis of varṇa.** But the above formulation goes considerably beyond what Madhva's Bhāṣya actually says.

---

## 1. Gītā 4.13: Madhva explicitly accepts guṇa-vibhāga

The Lord says:

**चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।**
**तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ॥ ४.१३ ॥**

Madhvācārya explains:

**अहमेव हि कर्तेत्याह– चातुर्वर्ण्यमिति ।**
**चतुर्वर्णसमुदायः । सात्त्विको ब्राह्मणः । सात्त्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्र इति गुणविभागः ॥**

Thus Madhva explicitly establishes:

**सात्त्विकः → ब्राह्मणः**
**सात्त्विकराजसः → क्षत्रियः**
**राजसतामसः → वैश्यः**
**तामसः → शूद्रः**

So it would be wrong to claim that **guṇa has nothing whatsoever to do with varṇa**.

But equally, Madhva does **not** define the four varṇas through the modern four personality descriptions given above.

## 2. Madhva's guṇa-vibhāga is a technical hierarchy, not four stereotypes

The **Bhāvaprakāśikā** explains:

**निर्देशप्राथम्याद् रजोगुणादपि सत्त्वमधिकं क्षत्रिये । तत एव हेतोर्वैश्ये रजोऽधिकं तमसः । रजसस्तमोऽधिकमित्येव तामसः शूद्र उच्यते । न तु सत्त्वादपीति भावः ॥**

The **Prameyadīpikā** similarly explains the gradation:

**निर्देशप्राथम्यात् क्षत्रिये रजसः सत्त्वमधिकम् । तत एव वैश्ये तमसो रजः । तच्च समसत्त्वयुतम् । रजोऽपेक्षया तमोऽधिकं शूद्र इत्यसौ तामसः । सत्त्वं तु तमसोऽप्यधिकम् ॥**

And the **Bhāvaratnakośa** elaborates:

**राजससात्त्विकेष्वेव शुद्धसात्त्विकाः, किञ्चिद्रजोयुक्तसात्त्विकाः, समरजोयुक्तसात्त्विकाः, सत्त्वात् किञ्चिदूनतमोयुक्तसात्त्विकाः इति वर्णभेदः ।**

Therefore the Madhva position involves **relative predominance and combinations of guṇas**.

It is not:

“likes wealth = Vaiśya”

or

“lazy = Śūdra”

or

"intelligent and peaceful = Brāhmaṇa."

Those are **modern character sketches**, not Madhva's technical definitions.

### 3. Svābhāvika and Aupādhika Varṇa: the distinction that must not be ignored

Madhva's tradition makes a distinction that is essential for understanding this entire question. The varṇa division explained in the Bhāṣya is described by the commentators as **svābhāvika-varṇa-vibhāga**:

**भाष्योक्तः स्वाभाविकवर्णविभागः**

That is, the division explained by Madhva in terms of **sattva, rajas and tamas** concerns a natural or inherent differentiation. The Bhāṣya itself states:

**सात्त्विको ब्राह्मणः । सात्त्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्र इति गुणविभागः ।**

The commentators then distinguish this **svābhāvika** division from another division called **aupādhika**, stating:

**योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम्**

and explaining *yoni-bheda* through expressions such as:

**ब्राह्मणयोनिजो ब्राह्मणः**

Thus, the Madhva tradition does not collude every meaning of varṇa into a single category. There is a distinction between **svābhāvika varṇa**, connected with the inherent guṇic constitution explained in the Bhāṣya, and **aupādhika varṇa**, connected with *yoni-bheda* and functioning as the recognizable varṇa distinction in the empirical and social order.

This distinction is practically indispensable. In the overwhelming majority of cases, human beings do not possess direct knowledge of another jīva's intrinsic **svabhāva** or its complete guṇic constitution. One cannot simply look at a person's occasional behaviour and infallibly determine his svābhāvika status. A person may display sattva, rajas or tamas in particular actions, and such external manifestations do not by themselves give omniscient access to the intrinsic nature of the jīva.

Therefore, the **svābhāvika classification should not be confused with an ordinary social test administered by observing someone's temporary**

**conduct**. In practical society, varṇa operates through the **aupādhika distinction connected with yoni/birth**, which provides the recognizable basis for social order and prescribed obligations.

This is why it is wrong to argue:

“Since varṇa is connected with guṇa, society should simply inspect everyone's behaviour and reassign their varṇa whenever their conduct changes.”

That conclusion confuses **svābhāvika guṇic differentiation** with the **aupādhika varṇa-order**. The former concerns the natural distinction explained in Madhva's Bhāṣya; the latter concerns the operative distinction by which varṇa is recognized within society.

### 4. The word is guṇa-karma-vibhāga, not guṇa alone

The Lord does not say merely:

**गुणविभागशः**

He says:

**गुणकर्मविभागशः**

Thus the fourfold division has both:

**guṇa**
**karma**

and cannot be reduced to a person's psychological disposition alone.

This distinction becomes critical when the argument is made that **a temporary change in behaviour automatically constitutes a change of varṇa**.

### 5. The Mahābhārata *lakṣaṇa* passage: what it actually establishes

The Mahābhārata contains the well-known statement:

**शूद्रे चैतद्भवेल्लक्ष्यं द्विजे चैतन्न विद्यते ।**
**न वै शूद्रो भवेच्छूद्रो ब्राह्मणो न च ब्राह्मणः ॥**

The force of the **pūrvapakṣa** is clear:

If characteristics (*lakṣaṇa*) associated with one varṇa are found in someone belonging to another, and the expected characteristics are absent in the person

carrying the corresponding designation, then merely using the name cannot establish the person's excellence.

This is an important śāstric principle.

But one must distinguish two propositions:

**Proposition A**

**The qualities and characteristics of a person matter.**

**Yes.** Madhva's Gītā Bhāṣya explicitly establishes guṇa-vibhāga.

**Proposition B**

**Therefore varṇa is nothing except the presently observed personality of an individual, and varṇa automatically changes whenever those qualities change.**

**That conclusion does not follow merely from the Mahābhārata verse.**

It requires additional proof.

And Madhva's own treatment gives us reason to maintain the distinction between **guṇa**, **karma**, **varṇa**, and **adhikāra**.

## 6. MBTN 29.30: Madhva brings in śāstric adhikāra

Madhva states in **Mahābhārata Tātparya Nirṇaya 29.30**:

**वर्णेष्वज्ञेष्ववर्णस्तु न ज्ञानी स्यात् कथञ्चन ।**
**इति श्रुतेरवर्णस्य ज्ञापनप्राप्तिरेव न ॥ २९.३० ॥**

Whatever detailed interpretive issues may surround the cited Śruti, the doctrinal point relevant here is unmistakable: Madhva's discussion has moved into the question of **śāstric eligibility—adhikāra**.

This is not merely:

“What kind of personality does this individual have?”

It concerns **who possesses what śāstric eligibility and which dharmas apply to whom**.

## 7. MBTN 29.31 continues the discussion in terms of prescribed dharma

Immediately thereafter:

**ज्ञेयं सर्वत्रिवर्णस्थस्त्रीभिर्वेदान् विनाऽखिलम् ।**
**स्वीयपुन्नियतिः स्त्रीणां स्वदारनियतिर्नृणाम् ॥ २९.३१ ॥**

Again, the discussion concerns **the three varṇas, women, and their respective niyamas/dharmas**.

This is significant.

If Madhva intended varṇa simply to mean:

“Whatever personality type someone currently resembles,”

there would be no reason for the discussion to proceed in terms of **varṇa-specific niyama and adhikāra**.

## 8. The decisive Madhva statement: a Śūdra can be sāttvika

The Gītā Tātparya material cited in the ṭīkās says:

**शूद्रो वा अन्यो वा विष्णुभक्तश्चेत्सात्त्विक एव ।**
**ब्राह्मणादिरप्यवैष्णवश्चेत्तामस एव ॥**

This is one of the most important statements for this discussion.

It says:

A Śūdra—or anyone else—who is a devotee of Viṣṇu is **sāttvika**; while even a Brāhmaṇa who is devoid of Viṣṇu-bhakti is **tāmasa**.

Now compare this directly with Madhva's 4.13 Bhāṣya:

**सात्त्विको ब्राह्मणः । ... तामसः शूद्रः ।**

The two statements must be read together.

Madhva can say:

**सात्त्विको ब्राह्मणः**

and simultaneously:

**शूद्रो ... सात्त्विक एव।**

Therefore the statement

**“sāttvika”**

cannot simply be treated as an automatic declaration:

**“therefore this individual has become a Brāhmaṇa in every śāstric sense.”**

That inference would contradict the very distinction preserved by Madhva's own texts.

***This must, however, be read together with the distinction between svābhāvika and aupādhika varṇa. The fact that a person displays sattva, or even possesses a higher degree of sattvic excellence, does not mean that ordinary observers thereby acquire the ability to discard the aupādhika varṇa-order and reclassify him merely from external behaviour.***
***Madhva's system does not authorize such casual reassignment of varṇa.***

*The opponent may say:*

**“You yourself admitted that a Śūdra can be sāttvika, so now varṇa must be determined by observed guṇas.”**

*My answer:*

**No. That is precisely the confusion. The existence of sattva in a person and the practical aupādhika recognition of varṇa are not identical questions.**

## 9. The converse is equally decisive

Madhva says:

**ब्राह्मणादिरप्यवैष्णवश्चेत्तामस एव ॥**

A Brāhmaṇa can therefore be **tāmasa** in the relevant guṇa/spiritual sense.

Does Madhva conclude:

“Therefore he has automatically become a Śūdra”?

No.

This establishes the essential distinction:

**guṇa-status ≠ automatically identical with every aspect of varṇa-status.**

Hence:

**sāttvika ≠ automatic varṇa-conversion**

and

**tāmasa ≠ automatic varṇa-conversion.**

## 10. This is exactly why Hari-bhakti must be distinguished from varṇa

The Gītā Tātparya statement is not weakening the varṇa doctrine.

It is establishing something even more important:

**Varṇa is not the measure of spiritual excellence.**

A Śūdra can be a superior Vaiṣṇava.

A Brāhmaṇa can be an avaiṣṇava and therefore spiritually tāmasa.

Thus Madhva prevents two opposite errors:

**Error 1**

“Brāhmaṇa by varṇa therefore automatically spiritually superior.”

**Rejected.**

**Error 2**

“Since spiritual qualities matter, varṇa itself is merely a fluid psychological label.”

**Also not established.**

The former is defeated by:

**ब्राह्मणादिरप्यवैष्णवश्चेत्तामस एव**

The latter is defeated by Madhva's continued treatment of **varṇa, karma, dharma and adhikāra** as distinct śāstric categories.

## 11. The real mistake in the modern four-type theory

The modern narrative makes the following equation:

**guṇa → varṇa → automatic varṇa-change**

But Madhva's material supports something more nuanced:

**guṇa + karma → varṇa-vibhāga**

while:

**Hari-bhakti → spiritual excellence**

and:

**varṇa-dharma + adhikāra → specific śāstric duties and eligibility.**

These cannot simply be collapsed into one another.

## 12. The Mahābhārata *lakṣaṇa* verse therefore cannot carry the entire argument

The verse:

**शूद्रे चैतद्भवेल्लक्ष्यं द्विजे चैतन्न विद्यते...**

is perfectly useful against the proposition:

“The mere external label is sufficient regardless of conduct and qualities.”

But it does **not automatically establish**:

“Anyone displaying those qualities has thereby acquired every right, duty and adhikāra of the corresponding varṇa.”

That is a separate proposition.

The distinction is crucial:

**Possessing a quality is not the same proposition as possessing every śāstric adhikāra associated with a varṇa.**

## 13. Conclusion

The position emerging from the supplied Madhva texts can be stated precisely:

**1. Guṇa is genuinely relevant to varṇa.**

Madhva explicitly says:

**सात्त्विको ब्राह्मणः । सात्त्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्रः ।**

**2. But guṇa is not being presented as four crude personality stereotypes.**

Madhva's ṭīkās explain **relative predominance and combinations of the guṇas**.

**3. Karma is equally part of the Lord's statement.**

**गुणकर्मविभागशः**

Therefore the system cannot be reduced to psychology.

**4. The Mahābhārata *lakṣaṇa* teaching establishes the importance of corresponding qualities.**

It defeats the idea that **mere designation without corresponding characteristics is sufficient**.

**5. But that does not by itself establish automatic varṇa-conversion.**

The inference:

**"possesses X quality → therefore has acquired every śāstric status of X-varṇa"**

requires separate pramāṇa.

**6. Madhva's tradition also distinguishes svābhāvika and aupādhika varṇa.**
The varṇa-division explained in Madhva's Bhāṣya through guṇas is described in the ṭīkā tradition as **svābhāvika varṇa-vibhāga**—a natural or inherent distinction. At the same time, it distinguishes an **aupādhika** varṇa-division arising from **yoni-bheda**:

**योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम् ।**

Thus, one must not simply equate the observable manifestation of a particular guṇa with the entirety of a person's socially operative varṇa-status. Since

another person's intrinsic **svabhāva** is not ordinarily available to direct human knowledge, the **aupādhika distinction connected with yoni/birth provides the practical basis by which varṇa operates within the social and śāstric order**. The Madhva commentary explicitly treats both **svābhāvika and aupādhika cāturvarṇya** as relevant to the Lord's statement.

**7. Madhva's own statements require us to distinguish guṇa-status from every aspect of varṇa-status**

**शूद्रो ... विष्णुभक्तश्चेत्सात्त्विक एव ।**

A Śūdra can be sāttvika.

**8. Likewise, a Brāhmaṇa can be tāmasa.**

**ब्राह्मणादिरप्यवैष्णवश्चेत्तामस एव ।**

Therefore:

**सत्त्व ≠ automatically ब्राह्मणत्व**

and

**तमस् ≠ automatically शूद्रत्व.**

**9. Spiritual superiority is therefore not determined merely by varṇa.**

For Madhva, **Viṣṇu-bhakti is decisive for spiritual excellence**.

**10. Yet varṇa-dharma and adhikāra remain meaningful śāstric categories.**

MBTN **29.30–31** itself proceeds into questions of **śāstric eligibility and varṇa-specific niyama**.

**11. Therefore the modern equation is untenable as a statement of Madhva's doctrine.**

**"Guṇa matters" — Yes.**

**"Karma matters" — Yes.**

**"Lakṣaṇa matters" — Yes.**

**"Hari-bhakti determines spiritual excellence" — Yes.**

But:

**“Varṇa is merely a person's current personality type, and automatically changes whenever his observed qualities change” — that is not established by the cited Madhva pramāṇas.**

## Madhvacharya’s Geeta Bhasya

https://dvaitavedanta.in/category-details/2203/567/sharam/2-shar/catara/braham

चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः ।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम् ।। १३ ।।

**भाष्यम्**

अहमेव हि कर्तेत्याह– चातुर्वर्ण्यमिति ।। चतुर्वर्णसमुदायः । सात्त्विको ब्राह्मणः । सात्त्विकराजसः क्षत्रियः । राजसतामसो वैश्यः । तामसः शूद्र इति गुणविभागः ।।

***भावप्रदीपिका***

यत्पूर्वं सर्वकर्मकर्तृत्वं भगवतोऽभिप्रेतं तत्परतयोत्तरश्लोक-मवतार्य व्याचष्टे– अहमेवेति । ‘गुणकर्मविभागशः’ इत्युक्तौ गुणकर्मविभागौ दर्शयति– सात्त्विक इति ।।

***भावप्रकाशिका***

न चाश्चर्यं भगवतः सर्वकर्तृत्वं सर्वयज्ञभोक्तृत्वम्, तत एव हेतोः सर्वकर्मफलदत्वं च । यतः स एव सर्वकर्मिणां स्रष्टेति भावेनोत्तरश्लोकमवतार्य व्याचष्टे– अहमेवेति । समुदायसमुदायिनोरत्यन्तभेदाभावात् चतुर्वर्णसमुदायः ‘चातुवर्ण्यम्’ इति विवरणं युज्यते । न च समुदायस्यावस्तुत्वम्, पटस्याप्यवस्तुत्वापत्तेरिति भावः । तत्र तावत् सत्त्वादिगुणत्रयविभागेन चतुर्वर्णोत्पत्तिं दर्शयति– सात्त्विक इत्यादिना । निर्देशप्राथम्या-द्रजोगुणादपि सत्त्वमधिकं क्षत्रिये । तत एव हेतोर्वैश्ये रजोऽधिकं तमसः । रजसस्तमोऽधिक-मित्येव तामसः शूद्र उच्यते । न तु सत्त्वादपीति भावः ।।

***प्रमेयदीपिका***

‘चातुर्वर्ण्यम्’ इत्यस्य सङ्गतिं सूचयंस्तात्पर्यमाह– अहमेव हीति ।। यस्मादहमेव चातुर्वर्ण्यस्य कर्ता, त्रैविद्याश्च तदन्तर्भूतास्तस्मात् स्वपितरं मां परित्यज्याऽन्यदेवता यजन्तः कथं महाफलभाजो भवेयुः? इत्याहेत्यर्थः । ‘विचित्रा हि तद्धितगतिः’ इति वचनाद् अतिरिक्तार्थसम्भवे ‘चतुर्वर्णादिभ्यः स्वार्थे उपसङ्ख्यानम्’ (७.१.३ वार्तिकम्) इति नाऽदरणीयमिति भावेनाऽह – चतुर्वर्णेति ।। वर्णाश्चत्वारः, गुणास्त्रयः । तत्कथं तेषु गुणविभागः ? इत्यत आह– सात्विक इति।। राजसस्थसात्विकेष्वेवायं विभाग इति ज्ञातव्यम् । निर्देशप्राथम्यात् क्षत्रिये रजसः सत्वम् अधिकम् । तत एव वैश्ये तमसो रजः । तच्च समसत्वयुतम् । रजोऽपेक्षया तमोऽधिकं शूद्र इत्यसौ तामसः । सत्वं तु तमसोऽप्यधिकम् ।।

***भावबोधः***

‘राजसास्तु नरास्तत्र विप्रा राजससात्विकाः इत्यादितात्पर्योदाहृत-प्रमाणानुरोधाद् आाह– राजसस्येति ।। निर्देशेति ।। ‘सात्त्विकराजसाः’ इति भाष्ये सत्त्वस्य प्रथमनिर्देशादित्यर्थः । सत्त्वमधिकमिति ।। ‘सात्त्विका स्वल्परजसः क्षत्रियाः’ इति प्रमाणादिति भावः । तत एवेति ।। ‘राजसतामसाः’ इति भाष्ये

रजसः प्रथमं निर्देशादेवेत्यर्थः । समसत्त्व-युतमिति ।। ‘सत्त्वरजसो वैश्याः’ इति वचनादिति भावः । ‘अतिस्वल्पसत्त्वाधिक्येन तामसः’ इति प्रमाणानुसारेण तामसः शूद्र इति भाष्यं व्याचष्टे– रजोऽपेक्षयेति ।। मुक्तियोग्यमनुष्यवर्ण-विभागोऽयम् । तदुक्तम् । ‘ये तु भागवता वर्णास्तेषां भेदोऽयमीरितः’ इति । उपलक्षणं चैतत् ।

‘त्रैविद्यमात्रा विष्णोर्ये सर्वाधिक्ये ससंशयाः ।
अन्याधिक्यं न मन्यन्ते श्रीशाद् राजसराजसा’

इत्यादिप्रमाणानुसारेण राजसराजसादयोऽपि ग्राह्याः । अन्यथा ‘यस्मादहमेव चातुर्वर्ण्यस्य कर्ता, त्रैविद्याश्च तदन्तर्भूता’ इत्याद्यसङ्गतं स्यादिति मन्तव्यम् ।।

***भावदीपः***

।। इति वचनादिति ।। भाष्यकारीयवचनादित्यर्थः ।। अतिरिक्तेति ।। स्वार्थादन्यसमूहार्थत्वसम्भव इत्यर्थः ।। इति नादरणीयमिति ।। पञ्चमाध्यायाद्यपादे ‘गुणवचन-ब्राह्मणादिभ्यः’ (पा.सू.५.१.१२४) इति सूत्रे वार्तिकोक्तं स्वार्थेऽप्यनुपसङ्ख्यानं नादरणीय-मित्यर्थः ।। ‘राजसानां मध्ये सात्विका एव भागवता विप्रादयः’ इत्याद्यष्टादशाध्याय-तात्पर्यानुरोधेन वा ‘राजसास्तु नृपास्तत्र विप्रा राजससात्विकाः’ इत्यादि तात्पर्यानुरोधेन वाऽऽह- राजसानां मध्य इति ।। निर्देशेति ।। ‘सात्विकराजसः’ इति भाष्ये सात्विकपदस्य प्रथमं निर्देशादित्यर्थः । ‘सञ्ज्ञाप्रमाणत्वात्’ इतिवदयं निर्देशो ज्ञेयः ।। ‘सात्विकाः स्वल्परजसः क्षत्रियाः सत्वराजसाः’ इत्यादिमानानुरोधादाह– क्षत्रिय इत्यादि ।। तत एव इति भाष्ये रजःपदस्य निर्देशप्राथम्यादेवेत्यर्थः ।। रज इति ।। ‘अधिकम्’ इत्यनुषङ्गः । व्यक्तमेतत् सर्व-मन्तिमाध्यायतात्पर्ये ।।

***वाक्यार्थप्रदीपः***

ननु चतुर्वर्णसमूह इति समूहे चतुर्वर्णशब्दात् ष्यञ्व्याख्यान-मयुक्तम् । समूहार्थे तद्विधायकाभावात् । ‘गुणवचनब्राह्मणादिभ्यः कर्मणि च’ इति गुणवचनेभ्यो ब्राह्मणादिभ्यश्चादौ ष्यञ्विधानात् अस्य च तादृग्रूपत्वात् ‘एतत्सूत्र एव चतुर्वर्णादीनां स्वार्थे ष्यञ् वाच्यः’ इति वार्तिककारेण स्वार्थे ष्यञ्विधानात् समूहे तदङ्गीकारे सूत्रविरोधात् कृद्वचनविरोधाच्च-(मातृकालुप्ता)..इत्यतो न तावत् साधकाभावः । ‘प्रत्यय’ इत्यादाविव ‘तद्धित’ इति एकवचननिर्देशे कर्तव्ये तथा निर्देशमकृत्वा बहुवचननिर्देशसूचित ‘विचित्रा हि तद्धितगति’रिति वचनादेव समूहार्थेऽपि ष्यञ्सम्भवात् । अत एव प्रकृत्यारब्धसमूहार्थपरतया मुख्यप्रत्ययत्वोपपत्तौ च स्वार्थे कप्रत्यत्वाभ्युपगमानौचित्येन स्वार्थे तद्विधायकवचनस्यासम्भवित्वात् न तद्विरोधोऽपीत्याह–विचित्रा हि तद्धितगतिरिति वचनादित्यादि ।।।

***भावरत्नकोशः***

ननु समुदायेऽभिधेये ष्यञोऽविधानात् कथं चतुर्वर्णसमुदाय इति भाषणमित्यत आह– विचित्रेति ।। अतिरिक्तेति ।। स्वार्थातिरिक्तेत्यर्थः । प्रत्ययानां प्रकृत्यर्थाति-रिक्तार्थ एवानुशासनं भूम्ना दृश्यते । अयं च ष्यञ्प्रत्ययः प्रातिपदिकार्थातिरिक्ते समुत्पादयितुं युक्तः । सम्भवात् । प्रातिपदिके एव तदुत्पादनं नातीव चतुरस्रमिति युक्तः समुदायार्थः प्रत्यय इति भाष्यभाव इत्याशयः । प्राचीनटीकायां तु ‘समुदायसमुदायिनोरत्यन्तभेदाभावात् ‘चतुर्वर्णा एव चातुर्वर्ण्यम्’ इति स्वार्थिकष्यञ्प्रत्यय एव ‘चतुर्वर्णसमुदायश्चातुर्वर्ण्यम्’ इति विवृत इत्युक्तम् । ‘चत्वारश्च ते वर्णाश्च’ इति भाष्ये विशेषणसमासोऽयं न द्विगुरिति न ङीप् ।

‘राजसास्तु नरास्तत्र विप्रा राजससात्त्विकाः’ इत्यष्टादशाध्यायतात्पर्यनिर्णयोदाहृत-प्रमाणं राजसानां मध्ये सात्त्विका एव भागवता विप्रादय इति तत्रत्यभगवत्पादीयवचनं चानुरुन्धान एतद्भाष्यनिष्कर्षमाह – राजसस्थ सात्त्विकेष्वेवेति ।। जीवास्त्रिविधाः । सात्त्विका राजसा-स्तामसाश्चेति । तत्र राजसा अपि त्रिविधाः । राजससात्त्विका राजसराजसा राजसतामसाश्चेति । तत्रापि ये राजससात्त्विकास्तेष्वित्यर्थः । ‘राजससात्त्विकेषु’ इति वक्तव्येऽपि ‘राजसस्थ’ इति वचनं तद् राजसस्थसात्त्विकेष्वेव शुद्धसात्त्विका इत्युत्तरप्रस्थानमनुसन्धापयितुम् । एवकारेण राजसस्थसात्त्विकेभ्योऽन्यत्रैवं विभागाभावं सूचयति । ।। निर्देशेति ।। ‘सात्त्विकराजसः’ इति भाष्ये सात्त्विकशब्दस्य प्रथमं निर्देशादित्यर्थः । ‘रजसः’ इति पञ्चमी ।। रजोऽपेक्षयेत्यर्थः । तत एव राजसतामस इति निर्देशप्राथम्यादेव । रजः अधिकम् । तच्च रजः समसत्त्वयुतं स्वसमसत्त्वगुणेन युक्तं वैश्य इति ज्ञातव्यमित्यर्थः । ‘तामसः शूद्रः’ इति भाष्यं ‘रजसस्तमोऽधिकमित्येतावता तामसः शूद्र उच्यते, न तु सत्त्वादपीति’ प्राचीन-टीकां हृदि कृत्वा

विवृणोति– रजोऽपेक्षयेति ।। तमसोऽप्यधिकं ‘शूद्रे’ इति वर्तते । एतदेव प्रमेयं सप्रपञ्चं ‘राजसस्थसात्त्विकेष्वेव शुद्धसात्त्विकाः, किञ्चिद्रजोयुक्तसात्त्विकाः, समरजोयुक्त-सात्त्विकाः, सत्त्वात् किञ्चिदूनतमोयुक्तसात्त्विका इति वर्णभेदः । सत्त्वप्रधानत्वाद् एतानारभ्यो-त्तरोत्तरं सर्वेऽपि मोक्षयोग्या’ इति तात्पर्यनिर्णयात् । राजससात्त्विकेषु ‘विप्रा राजससात्त्विकाः’ इत्यादेः ‘राजससात्त्विकानारभ्य हिरण्यगर्भावसानाः सर्वेऽपि हि मोक्षयोग्याः । गुणान्तरापेक्षयैषु सत्त्वाधिक्यात् । मोक्षयोग्यता भागवतानामेव। अतो राजससात्त्विकादयः सर्वेऽपि भागवता एव’ इत्यन्तात् तट्टीकाग्रन्थाच्चावसेयम् । अत्र भाष्यटीकयोरुक्तमुपलक्षणम् । ये नित्यत्रैविद्या राजसराजसास्तेऽपि ग्राह्याः । ते च–

‘त्रैविद्यमात्रा विष्णोर्ये सर्वाधिक्ये ससंशयाः ।
अन्याधिक्यं न मन्यन्ते श्रीशाद्राजसराजसाः ।।
सत्त्वाधिको मोक्षयोग्यो योग्योऽन्धतमसस्तथा ।
तम उत्तरो रजो भूयान् समो वा सृतिपात्रकः ।।’ इति ।

तात्पर्यनिर्णये । राजससात्त्विकान् उक्त्वा राजसराजसादीनाह– त्रैविद्येति ।। कालतो भागवतान् जायमानान् व्यवच्छिनत्ति– त्रैविद्यमात्रा इति ।। सर्वाधिक्ये सर्वप्रकारेणाधिक्य इति गमयितव्यमिति । सत्त्वाधिको राजससात्त्विकादिः, तम उत्तरो नराधमादिः, रजोभूयान् त्रैविद्यः, सम एकप्रकारगुणत्रयोऽज्ञ इति च टीकाग्रन्थे चोक्तेः । एवमेतेषां ग्रहणेन ‘यस्मादहमेव चातुर्वर्ण्यस्य कर्ता, त्रैविद्याश्च तदन्तर्भूताः’ इति पूर्वटीकावाक्येन विरोधः परिहृतो भवति ।

केचित्तु राजससात्त्विकेष्विव राजसराजसेषु त्रैविद्येष्वपि योनिभेदकृत औपाधिको वर्ण-विभागोऽस्ति । भाष्योक्तश्च स्वाभाविकः । अयं त्वौपाधिकः । यथोक्तम् ‘योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम्’ इति । योनिभेदकृतत्वं च ब्राह्मणयोनिजो ब्राह्मणः इत्यादिरूपेण द्रष्टव्यम् । ‘राजसस्थसात्त्विकेष्वेव’ इति टीकायामेवकारः स्वाभाविकतद्व्यवच्छेदार्थः । तथा च चातुर्वर्ण्य-स्याहमेव कर्तेत्यत्र स्वाभाविकौपाधिकोभयविधमपि चातुर्वर्ण्यं ग्राह्यम् । तत्र च त्रैविद्यानामन्तर्भावात् ‘त्रैविद्याश्च तदन्तर्भूताः’ इति टीकावाक्येन न विरोधशङ्काऽवकाश इति आहुः । ‘शमो दमः’ इत्यादिना श्लोकत्रयेणाष्टादशाध्याये वक्ष्यत इति भाष्यार्थः ।।

*भावदीपिका*

ननु ‘गुणवचनब्राह्मणादिभ्यः कर्मणि च’ इति सूत्रे ‘चतु-र्वर्णादिभ्यः स्वार्थे उपसङ्ख्यानम्’ इति वार्तिकेन चतुर्वर्णादिभ्यः स्वार्थे ष्यञ्प्रत्ययविधानात् ‘चतुर्वर्णा एव चातुर्वण्यम्’ इति वक्तव्यम्, ‘चतुर्वर्णसमुदाय’ इति कथं ष्यञ्प्रत्ययः समुदायार्थ आनीयत इत्यत आह– विचित्रा हीति ।। ष्यञ्प्रत्ययस्तु तद्धितप्रत्यय एवेति द्रष्टव्यम् ।। अतिरिक्तार्थेति ।। स्वार्थव्यतिरिक्तसमुदायरूपार्थेत्यर्थः । तथा च चतुर्वर्णशब्दात् समुदायार्थे ष्यञ्प्रत्यये ञित्त्वाद् आदिवृद्धौ ‘चातुर्वर्ण्यम्’ इति भवतीति द्रष्टव्यम् । तेषु चतुर्षु वर्णेषु । ‘राजसास्तु नरास्तत्र विप्रा राजससात्त्विका’ इत्यादितात्पर्योदाहृतप्रमाणानुरोधात् । तथा च राजसस्थसात्त्विकेष्वेव शुद्धसात्त्विकाः, किञ्चिद्रजोयुक्तसात्त्विकाः, समरजोयुक्तसात्त्विकाः, सत्त्वात् किञ्चिदूनतमोयुक्तसात्त्विका इति वर्णभेद इति गीतातात्पर्ये अष्टादशाध्यायगताचार्यवाक्यं मनसि कृत्वाऽह– राजसस्थेति ।। भाष्ये ‘सात्त्विको ब्राह्मण’ इत्यत्र रजआद्यमिश्रशुद्धसात्त्विको ब्राह्मण इत्यवगन्तव्यम् ।।

।। निर्देशेति ।। ‘सात्त्विकराजसः’ इति भाष्ये सत्त्वस्य प्रथमं निर्देशादित्यर्थः ।। सत्त्वमधिकमिति ।। ‘सात्त्विकाः स्वल्परजसः’ इति प्रमाणादिति भावः ।। तत एवेति ।। ‘राजसतामसः’इति भाष्ये रजसः प्रथमं निर्देशादेवेत्यर्थः । तच्चेति ।। तमसोऽधिकं रजश्चेत्यर्थः ।। समसत्त्वेति ।। ‘समसत्त्वरजसो वैश्याः’ इति वचनादिति भावः । ‘अतिस्वल्पसत्त्वाधिक्येन तामसः’ इति प्रमाणानुसारेण ‘तामसः शूद्र’ इति भाष्यं व्याचष्टे– रजोऽपेक्षयेति ।। अधिक-मिति ।। किञ्चिदधिकमित्यर्थः । मुक्तियोग्यमनुष्यवर्णविभागोऽयमित्यवगन्तव्यम् । यथोक्तम् -‘ये तु भागवता वर्णास्तेषां भेदोऽयमीरितः’ इति । उपलक्षणं चैतत्–

त्रैविद्यमात्रा विष्णोर्ये सर्वाधिक्ये ससंशयाः ।
अन्याधिक्यं न मन्यन्ते श्रीशाद्राजसराजसाः ।।

इत्यादिप्रमाणानुसारेण राजसराजसादयोऽपि ग्राह्याः । अन्यथा ‘यस्माच्चतुर्वर्णस्याहमेव कर्ता त्रैविद्याश्च तदन्तर्भूता’ इत्याद्यसङ्गतं स्यादिति मन्तव्यम् ।।

...द्जगद्गुरु श्रीमन् मध्वाचार्य मूलमहासंस्थानम्

***भावप्रकाशः***

‘राजसास्तु नरास्तत्र विप्रा राजससात्विकाः’ इत्यादिप्रमाणानु-सारेणाह– राजससात्त्विकेष्विति ।। जीवाः त्रिविधाः । सात्त्विकाः राजसाः तामसाश्च । राजसा अपि त्रिविधाः । सात्त्विकादिभेदात् । तत्र ये राजससात्त्विकाः तेष्वित्यर्थः एवकारेण राजस-सात्त्विकेभ्योऽन्यत्रोक्तविभागाभावं सूचयति । तच्च तात्पर्यनिर्णये स्पष्टम्– समसत्त्वयुताविति ।। समसत्त्वरजसा वैश्या इत्युक्तेरिति भावः । मुक्तियोग्यमनुष्यवर्णविभागोऽयम् । तदुक्तम् ‘ये तु भगवता वर्णास्तेषां भेदोऽयमीरितः’ इति । उपलक्षणञ्चैतत् । ये नित्यत्रैविद्याः राजसराजसाः तेऽपि ग्राह्याः । तेन ‘चातुर्वर्ण्यस्याहमेव कर्ता त्रैविद्याश्चतदन्तर्भूता’ इति पूर्ववाक्याविरोध इति भावबोधकृतः ।
अन्ये तु राजससात्त्विकेष्विव राजसराजसेषु त्रैविद्येष्वपि वर्णविभागोऽस्ति । इयांस्तु विशेषः । भाष्योक्तः स्वाभाविकवर्णविभागः, अयं त्वौपाधिकवर्णविभागः । योनिभेदकृतत्वात् । यथोक्तम् ‘योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम्’ इति । तथाच चातुर्वर्ण्यस्याहमेव कर्तेत्यत्र स्वाभावि-कौपाधिकभेदेन द्विविधमपि चातुर्वर्ण्यं ग्राह्यम् । तत्र च त्रैविद्यानामन्तर्भावात् । त्रैविद्याश्च तदन्तर्भूता इति न विरोधः । योनिभेदकृतत्वं च ब्राह्मणयोनिजो ब्राह्मण इत्यादिरूपेण द्रष्टव्यमित्याहुः ।।

## Madhvacharya’s Geeta Tatparya Nirnaya

https://www.dvaitavedanta.in/category-details/3038/295/sharam/1-shar/catara/shalka

**तात्पर्यम्**

‘सत्वसत्वाधिकरजोरजोभिस्तमसा तथा ।
वर्णा विभक्ताश्चत्वारः सात्विका एव वैष्णवा’ इति च ।
कर्मविभागं शमो दम इत्यादिना वक्ष्यति ।
‘वैष्णवाः सात्विका एव तामसा एव चापरे ।
दौर्लभ्यसुलभत्वेन तेषां वर्णादिभिन्नता’ इति च ।
‘स्वाभाविको ब्राह्मणादिः शमाद्यैरेव भिद्यते ।
योनिभेदकृतो भेदो ज्ञेय औपाधिकस्त्वयम् ।
विष्णुभक्तिश्चानुगता सर्ववर्णेषु विश्पतिम् ।
आरभ्य हीयतेऽथापि भेदः स्वाभाविकस्तत’ इति नारदीये ।
‘कर्ताऽपि भगवान्विष्णुरकर्तेति च कथ्यते ।
तस्य कर्ता यतो नान्यः स्वतन्त्रत्वात्परात्मन’
इति च । अपिशब्दो गुणसमुच्चयार्थः । कर्ता मे नास्तीत्यपि विद्धीति ।। १३ ।।

***प्रकाशिका***

“चातुर्वर्ण्य”मित्येतं श्लोकं व्याचष्टे ।। सत्त्वेत्यादिना ।। अस्यार्थः । उत्सर्गेण सत्त्वे सत्त्वाधिकरजआदिगुणभेदेन “शमो दमस्तपः शौचं क्षान्तिरार्जवमेव चे”त्याद्युक्तकर्मभेदेन च ब्राह्मणाद्याश्चत्वारो वर्णाः विष्णुसृष्टाः तत्र शूद्रो वा अन्यो वा विष्णुभक्तश्चेत्सात्विक एव । ब्राह्मणादिरप्यवैष्णवश्चेत्तामस एव ।। एतदेव स्पष्ट्यते ।। वैष्णवाः सात्विका इत्यनेन ।। अर्थतश्चाधमवर्णादिषु राजसत्वादिवचनं न तु अवैष्णवानां सुलभत्वाभिप्रायमित्यवगन्तव्यम् । शमादिकं ब्राह्मणस्य शौर्यादिकं क्षत्रियस्येत्यादिकमप्यौत्सर्गिकम् । ब्राह्मणवच्छमादेः स्वतस्तु ब्राह्मणकर्मवशाद्वर्णान्तरत्वेन जातेष्वप्युपलम्भात् । अतश्च ब्राह्मणादीनामेतानि लक्षणानीत्यवगन्तव्यम् । विष्णुभक्त्यादेर्ब्राह्मणवद्वर्णान्तरेऽप्युपलब्धावपि तत्तत्तारतम्यात् वर्णेषु स्वाभाविकभेदसिद्धिः चातुर्वर्ण्यस्य कर्तारं मां विद्धि न त्वन्यानिति जीवाऽभेदनिवृत्तिः ।। १३ ।।

***न्यायदीपिका***

भगवद्भजनं विना कुतो न फलमित्यतस्तस्य पितृत्वाद्युज्यत इत्युच्यते ।। चातुर्वर्ण्यमिति ।। अत्र गुणानां त्रित्वात्कथं चातुर्वर्ण्यस्य गुणविभाग इत्याशङ्क्यां स्मृत्यैव परिहरति ।। सत्त्वेति ।। राजससात्विकेषु सात्विको ब्राह्मणः । सत्वमधिकं यतो रजसस्तद्वान् क्षत्रियः । समसत्वरजोवान्वैश्यः । रजोऽपेक्षयाधिकतमोवान् शूद्र इत्यर्थः । अनेन सत्वप्रधानत्वं ब्राह्मणादीनामुक्तम् । तस्यापवादमाह ।। सात्विका एवेति ।। वैष्णवा एव सात्विकाः सत्वप्रधानाः । न ब्राह्मणत्वादिप्रयुक्तं सात्विकत्वादीत्यर्थः । कर्मविभागः कीदृश इत्यत आह ।। कर्मेति ।। यदि वैष्णवा एव सात्विकास्तर्हि ब्राह्मणाः सात्विका इत्याद्युक्तिः किं निमित्तेत्याशङ्क्यां स्मृत्यैव परिहरति ।। वैष्णवा इति ।। अपरे द्वेषिणः । वैष्णवानां शूद्रादिषु दौर्लभ्याद्ब्राह्मणादिषु सौलभ्याद्ब्राह्मणा एव सात्विका इत्यादिरूपेण सात्विकत्वादीनां वर्णाश्रमभेदेन भिन्नतोच्यत इत्यर्थः । यथा सात्विकत्वादिकं न वर्णमात्रलक्षणं तथा शमादिकमपि न वर्णमात्रलक्षणम् । किं तु स्वाभाविकवर्णलक्षणमित्यत्र स्मृतिमाह ।। स्वाभाविक इति ।। नन्वस्वाभाविकं ब्राह्मणत्वादिकं कीदृशमित्यत आह ।। योनीति ।। अयमिति प्रसिद्धः । स्वाभाविकब्राह्मणस्यैव शमादिकम् । स्वाभाविकक्षत्रियस्यैव शौर्यादीत्याद्युक्तम् । तत्रापवादमाह ।। विष्णिवति । शमपदोदिता विष्णुभक्तिः न केवलं ब्राह्मणस्यैवापि तु सर्ववर्णेष्वनुगतेत्यर्थः । उपलक्षणं चैतत् । दमादिकमप्येवं द्रष्टव्यम् । क्षत्रिये शमवति राष्ट्रविप्लवः स्यादित्यतो नायं शमः प्रसिद्धः । अपितु विष्णुभक्तिरिति शम इति वक्तव्ये तदर्थ एवोक्तः । शमादीनां क्षत्रियादिष्वपि सद्भावे कथमयं ब्राह्मणोऽयं नेति स्वाभाविकवर्णभेदज्ञानमित्यत आह ।। विश्पतिमिति ।। ब्राह्मणे शमादीनां बाहुल्यात्क्षत्रियादिषु क्रमेणाबहुलत्वाच्छमादीनां बाहुल्याबाहुल्यतोऽयं ब्राह्मणोऽयं नेति स्वाभाविको वर्णभेदो ज्ञातव्य इत्यर्थः । यथा भवान्सर्वस्य कर्ता एवं भवतोप्यन्यः कर्ताऽस्ति किमित्यपेक्षायामुच्यते ।। तस्येति ।। तत्र कर्तारमप्यकर्तारं विद्धि कर्तृत्वस्य मायिकत्वादित्यन्यथाप्रतीतिनिरासाय स्मृत्यैव व्याचष्टे ।। कर्तेति ।। एवंविधकर्तृत्वाकर्तृत्वयोरविरुद्धत्वात्कर्तारमप्यकर्तारं विद्धीत्यत्रापिशब्दो व्यर्थ इत्यत आह ।। अपीति ।। तत्प्रकारं दर्शयति ।। कर्तेति ।। १३ ।।

***किरणावली***

पितृत्वाद्युज्यत इति ।। आदिपदेन तस्य कर्तृशून्यत्वादि गृह्यते । जीवास्त्रिविधाः सात्विका राजसास्तामसाश्च । तत्र देवासुरवर्गयोः सात्विकतामसयोश्चातुर्वर्ण्याभावाद्राजसेषु तत्संभवात्तत्रायं विचारः । ते त्रिविधाः । राजससात्विकाःमुक्तियोग्याः । राजसराजसाः राजसतामसाश्चनित्यसंसारिणः । तत्र राजससात्विकेष्वयं विभागः । ये तु भागवता वर्णास्तेषां भेदोऽयमीरित इति वचनादित्यर्थमभिप्रेत्य प्रवृत्तानि राजसस्थसात्विकेष्वेव शुद्धसात्विकाः किञ्चिद्रजोयुक्तसात्विकाः समरजोयुक्तसात्विकाः सत्वात्किञ्चिद्रूनतमोयुक्तसात्विका इत्यन्तिमाध्याय तात्पर्यवाक्यानि मनसि निधाय व्याचष्टे ।। राजससात्विकेष्विति ।। राजससात्विकत्वप्रयोजकं सत्त्वं त्रिविधम् । सत्वं रजस्तम इति तद्भेदाद्राजससात्विका अपि त्रिविधाः । राजससात्विकसात्विकाः राजससात्विकराजसाः राजससात्विकतामसा इति । तत्रराजससात्विकेषु सात्विको ब्राह्मण इत्यर्थः । तत्र सत्वावान्तरभूतरजस्तमसोरभावेन राजससात्विकत्वप्रयोजकस्य सत्वस्य सत्वसत्वरूपत्वेन शुद्धत्वादिति भावः । सत्वाधिकरज इत्येतद्व्याचष्टे ।। सत्वमधिकमिति ।। क्षत्रिये राजससात्विकत्वप्रयोजकसत्वावान्तरभेदरूपं तमो नास्ति । सत्वावान्तरभेदभूतरजसः सत्वमधिकमिति राजससात्विकराजसः क्षत्रिय इति भावः । रजोभिरित्यत्र सत्वरजोभिरिति संयोज्यार्थमाह ।। समसत्वरजोवानिति ।। सत्वावान्तरभेदभूतसत्वसमरजोवान्वैश्य इत्यर्थः । तमस्तु रजोगुणापेक्षया न्यूनमिति द्रष्टव्यम् । तदुक्तं प्रमेयदीपिकायाम् । वैश्येतमसो रजोऽधिकं तच्च समसत्वयुतमिति । तमसेत्यस्य रजोपेक्षयाधिकतमसेत्यर्थमभिप्रेत्याह ।। रजोपेक्षयेति ।। सत्वप्रभेदरजोपेक्षयैवाधिकतमोवान्नतुसत्वापेक्षया । तस्य तमोगुणापेक्षयात्यल्पमधिकत्वात् । शूद्रा अतिस्वल्पसत्वाधिक्येन तामसा इति वक्ष्यमाणत्वादिति भावः । ननु वैश्यस्य समसत्वरजस्कत्वात्सत्वप्राचुर्याभावात्सत्वाधिको मोक्षयोग्य इत्यादिविरोध इति चेन्न । क्षत्रियेरजोपेक्षया सत्वमत्यधिकं वैश्येत्यल्पमधिकमित्यल्पत्वविवक्षयाऽत्र साम्योक्तिसम्भवात् । अत एव शूद्रविषये अतिस्वल्पसत्वाधिक्येनेति प्रमाणे स्वल्पसत्वाधिक्यं वैश्ये अतिस्वल्पसत्वाधिक्यं शूद्रे इति द्योतयितुं अतिस्वल्पेत्युक्तम् । किं च वैश्यस्य समसत्वरजस्कत्वे अनेन सत्वप्रधानत्वं ब्राह्मणादीनामुक्तम् । तस्यापवादमाह ।। सात्विका एवेति ।। वैष्णवा एव सात्विकाः सत्वप्रधानाः न ब्राह्मणत्वादिप्रयुक्तं सात्विकत्वादीत्यर्थ इत्युत्तरग्रन्थे ब्राह्मणादीनां सत्वप्रधानत्वमित्युक्तम् । सात्विकत्वादीत्यादि पदेन

राजससात्विकत्वादीत्यर्थः । तेन राजससात्विकत्वराजसराजसत्वादि ग्रहणम् । अनेन मूले सात्विका इति बहुवचनमाद्यर्थ इत्युक्तं भवति । केषु चित्कोशेषु सात्विको ब्राह्मणः सत्वाधिकरजोवान् क्षत्रियो राजसतामसो वैश्यः तामसः शूद्र इत्यर्थः । उत्सर्गस्यापवादमाह ।। सात्विका एवेति ।। ये के वा सन्तु वैष्णवाश्चेत्सात्विका एवेत्यर्थ इति पाठो दृश्यते । सोप्युक्तार्थक एव ।

ननु ब्राह्मणादिविभागो राजससात्विकान्तर्गत इत्युक्तम् । राजससात्विकाश्च वैष्णवा एव । तथा च ब्राह्मणादित्वं वैष्णवत्वं चराजससात्विकेषु समनियतं वर्तत एवेति न ब्राह्मणत्वादि प्रयुक्तं सात्विकत्वादिकं किंतु वैष्णवत्वादि प्रयुक्तमिति कथमुच्यत इति चेन्न । सत्यं उभयं तेषु वर्तत इति तत्र सात्विकत्वादिकं किमुभय प्रयोज्यमुतान्यतरप्रयोज्यम् । नाद्यः । एकेनैव प्रयोजकेनोपपत्तावुभय कल्पने गौरवात् द्वितीये न ब्राह्मण्यप्रयुक्तं सात्विकत्वादिकम् । अवैष्णवेष्वपि ऋषिकुलप्रसूतत्वादिना ब्राह्मण्यादिसद्भावात् । अवैष्णवस्य वेदानधिकारित्वेपि तज्जात्युद्भवत्वमात्रेण ब्राह्मणत्वाद्युपपत्तेः । अतो वैष्णवत्व प्रयुक्तमेव सात्विकत्वादीति भावः ।। यदि वैष्णवा एव सात्विकास्तर्हीति ।। क्वचित् यदि वैष्णवा ये केपि सात्विकास्तर्हीति पाठः । नित्यसंसारिव्यावृत्त्यर्थमाह ।। द्वेषिण इति ।।

विवृतमेतच्छ्रीमत्पद्मनाभतीर्थ पूज्यचरणैः । शूद्रो वान्योवा विष्णुभक्तश्चेत्सात्विक एव । ब्राह्मणादिरप्यवैष्णवश्चेत्तामसादिरेव । अधमवर्णादिषु राजसत्वादिवचनं तत्र वैष्णवानां दुर्लभत्वाभिप्रायं उत्तमवर्णाश्रमिषु सात्विकत्ववचनं तत्र वैष्णवानां सुलभत्वाभिप्रायमित्यवगन्तव्यमिति । क्षत्रियादिषु क्रमेणेत्यनेन विष्पतिं विशां प्रजानां पतिं राजानमित्यर्थ उक्तो भवति ।। १३ ।।

***भावदीपः***

राजसास्तु नरास्तत्र विप्रा इत्यन्तिमाध्यायतात्पर्यानुरोधादाह ।। राजससात्त्विकोष्विति ।। न वर्णमात्रलक्षणमिति ।। किन्तु सात्त्विकत्वं वैष्णवलक्षणं तामसत्वं भगवद्द्वेषिलक्षणमिति योज्यम् ।। स्वाभाविकेति ।। स्वरूपतो यो ब्राह्मणादिर्न तु योनिकृत इत्यर्थः ।। प्रसिद्ध इति ।। सर्वव्यापारोपशमरूपो वा भगवदेकनिष्ठतारूपो वेत्यर्थः । तर्हि क इत्यत आह ।। अपि तु विष्णुभक्तिरिति ।। एवं विधेति ।। भिन्नाधिकरणकर्तृत्वाकर्तृत्वयोरित्यर्थः । मामित्यनुक्तौ कथमभेदशङ्का, तदुक्तौ तु कथं तन्निरास इत्यतो द्वयमपि व्यनक्ति स्वस्येत्यादिना ।। १३ ।।

***भावप्रकाशः***

राजसास्तु नरास्तत्र विप्रा राजससात्विका इत्युदाहरिष्यमाणप्रमाणानुसारेणाह । राजससात्विकेष्विति ।। सत्वापेक्षया अधिकं रजो यस्येति प्रतीयते तदनुपपन्नम् । येतु भागवता वर्णास्तेषां भेदोऽयमीरित इत्युक्तत्वेनैतेषां मुक्तियोग्यप्रभेदत्वावगमात् मुक्तियोग्यानां च सत्वाधिकः पुल्कसोऽपि यस्तु भागवतः सदेत्युक्तत्वेन सत्वाधिकस्यावश्यकत्वादित्य आह । सत्वमधिकं यत इति । सात्विकाः स्वल्परजसः क्षत्रिया इति वक्ष्यमाणत्वादिति भावः । अत्र ब्राह्मणक्षत्रिययोरुभयोरपि राजससात्विकप्रभेदत्वेपि ब्राह्मणे रजोन्यूनं तदपेक्षयाकिञ्चिदधिकं क्षत्रिय इत्यवान्तरभेदोद्रष्टव्यः ।। सत्व राजसा वैश्या इति प्रमाणं मनसि निधायाह । समसत्वरजोवानिति । अत्र रजोऽपेक्षया सत्वस्य किञ्चिदधिकत्वेऽपि तदविवक्षया साम्योक्तिरिति द्रष्टव्यम् ।। शूद्रा अतिस्वल्पसत्वाधिक्येन तामसा इति प्रमाणमनुरुध्याह । रजोपेक्षयेति । ब्राह्मणादीनां सत्वादिप्रधानत्वमित्युत्सर्गस्य सात्विका एव वैष्णवा इति नापवादकम् । तदर्थसङ्कोचत्वभावादित्यत आह । वैष्णवा एव सात्विका इति । न ब्राह्मणादिमात्रस्य सात्विकत्वादिकम् । किंतु वैष्णवानामेवेति संकोचकत्वादस्यापवादत्वमेवेति भावः । अनेन मूले सात्विका इति बहुवचनमाद्यर्थ इत्युक्तं भवति ।। नित्यसंसारिव्यावृत्यर्थमाह । ये द्वेषिण इति । इत्याद्युक्तमिति । वैश्यस्यैव कृष्यादि, शूद्रस्यैव परिचर्येत्युक्तमित्यर्थः । शमवतीति । अक्रौर्योपेत इत्यर्थः । विश्पतिमारभ्येत्यस्यार्थमाह ।। क्षत्रियादिषु क्रमेणेति ।। १३ ।।

***वाक्यविवेकः***

कथं चातुर्वर्ण्यस्य गुणविभाग इति । कारणमिति शेषः । सत्त्वेतीति ।

इतः परं टीकाभेदेन वाक्यानि भिद्यन्ते । सत्वेति । राजससात्त्विकेषु सात्विको ब्राह्मणः । सत्वादधिकं यतो रजस्तद्वान् क्षत्रियः ।। समसत्वरजोवान् वैश्यः । रजोपेक्षयाधिकतमोवान् शूद्र इत्यर्थः ।। अनेन सत्वप्रधानत्वं ब्राह्मणादीनामुक्तं तस्यापवादमाह ।। सात्त्विका एवेति । वैष्णवा एव सात्विकाः सत्त्वप्रधानाः । न ब्राह्मणत्त्वप्रयुक्तसात्विकत्वादीत्यर्थः इत्येकः टीकावाक्यपाठः ।। अस्यार्थः । राजससात्विकेष्विति । राजससात्विके ब्रह्मक्षत्रियवैश्यशूद्रेषु रजोऽपेक्षया अत्यधिकसत्त्ववान् ब्राह्मण

इत्यर्थः । सत्त्वादधिकं रज इति भ्रान्तिनिरासाय व्याचष्टे । सत्त्वमधिकमिति । तद्वानिति तदुभयवानिति भावः । रजः सामानाधिकरणसत्वस्याधिक्योक्तया तदुभयवत्त्वस्यैव लाभात् । अपवादमाहेति । अवैष्णवब्राह्मणविषये अपवादमाहेत्यर्थ इति । सत्त्वेति । सात्विको ब्राह्मणः सत्त्वाधिकरजोवान् क्षत्रियः । राजसतामसौ वैश्यः । तामसः शूद्र इत्यर्थः । उत्सर्गस्यापवादमाह । सात्विका इति । ये के वा सन्तु वैष्णवाश्चेत् सात्त्विका एवेत्यर्थः इति टीकान्तरपाठः । अस्यार्थः सुगमः । मूले शमदम इत्यादिना वक्ष्यतीति ।।
शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं बाह्यं कर्म स्वभावजम् ।
इत्यादिना वक्ष्यतीत्यर्थः ।। १३ ।।

गीता

गीता
न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ।। १४ ।।

तात्पर्यम्
जीवाभेदनिवृत्त्यर्थं मामिति विशेषणम् ।। १४ ।।

*न्यायदीपिका*
सर्वकर्तृत्वे भगवतः कर्मलेपः स्यादित्यत उच्यते ।। नमामिति ।। तत्र मामित्यस्य सिद्धत्वादिति मामिति पुनरस्मच्छब्दः किमर्थ इत्यत आह ।। जीवेति ।। स्वस्येश्वराभेदाभिप्रायेण स्वात्मानमुद्दिश्य न मां कर्माणि लिंपंतीत्यादि यो जानातीत्यन्यथाप्रतीतिः स्यात्तन्निराकरणार्थं इति मां योऽभिजानाति न स्वात्मानमिति भावेन मामिति विशेषणं प्रयुक्तमित्यर्थः ।। १४ ।।

*किरणावली*
मामिति पदाभावे कथमभेदप्रसक्तिः । कथं च तेन निषेध इत्यत आह ।। स्वस्येति ।। १४ ।।

*भावप्रकाशः*
मामिति पदाभावे भेदप्रसक्तिं दर्शयति ।। १४ ।।

*वाक्यविवेकः*
विशेषणं प्रयुक्तमिति । मामित्यस्य स्वत्वव्यावर्त्तकत्त्वात् विशेषणत्वमिति बोध्यम् ।। १४ ।।

Mahabharata Tatparya Nirnaya

https://dvaitavedanta.in/category-details/14110/14076/itahas/2-shar/malma/ekanat

शारीरदण्डसन्त्यागः पुत्रभार्यादिकानृते ।
तत्रापि नाङ्गहानिः स्याद् वेदना वा चिरं नतु ॥ २२॥

नचार्थदण्डः कर्तव्यो विप्रवैश्यादिभिः क्वचित् ।
शारीरदण्डविषये वैश्यादीनां च विप्रवत् ॥ २३॥

यथालब्धेन वर्तेत भिक्षया वा द्विजोत्तमः ।
शिष्ययाज्योपलब्धैर्वा क्षत्रधर्मेण वाऽऽपदि ॥ २४॥

महापदि विशां धर्मैः क्षत्रियः सुरविप्रयोः ।
अन्यत्र सर्ववित्तेन वर्तेतैतांश्च पालयन् ॥ २५॥

विरोधिनः क्षत्रियाच्च प्रसह्यैव हरेद् धनम् ।
सामादिक्रमतो धर्मान् वर्तयेद् दण्डतोऽन्ततः ।
अपलायी सदा युद्धे सतां कार्यमृते भवेत् ॥ २६॥
कृषिवाणिज्य गोरक्षा कुसीदं वैश्यजीवनम् ।
परिचर्यैव शूद्रस्य वृत्तिरन्ये स्वपूर्ववत् ।
वर्तेयुर्ब्राह्मणाद्याश्च क्रमात् पूज्या हरिप्रियाः ॥ २७॥

हरिभक्तावनुच्चस्तु वर्णोच्चो नातिपूज्यते ।
विना प्रणामं पूज्यस्तु वर्णहीनो हरिप्रियः ।
आदरस्तत्र कर्तव्यो यत्र भक्तिर्हरेर्वरा ॥ २८॥

ज्ञापनं क्षत्रियाणां च धर्मो विप्राभ्यनुज्ञया ।
तदभावे तु वैश्यानां शूद्रस्य परमापदि ॥ २९॥

'वर्णेष्वज्ञेष्ववर्णस्तु न ज्ञानी स्यात् कथञ्चन' ।
इति श्रुतेरवर्णस्य ज्ञापनप्राप्तिरेव न ॥ ३०॥

ज्ञेयं सर्वत्रिवर्णस्थस्त्रीभिर्वेदान् विनाऽखिलम् ।
स्वीयपुन्नियतिः स्त्रीणां स्वदारनियतिर्नृणाम् ॥ ३१॥

इति विनयपूर्वकम्
- अरविन्दलोचनः

SriKrishnarpanamastu !
KrishnamVandeJagatgurum !